শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥শ্রীমন্নারাযণীযে শততমং দশকম্॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীমন্নারাযণীযে শততমং দশকম্ ॥

## কেশাদিপাদৱর্ণনম্

অগ্রে পশ্যামি তেজো নিবিডতর কলা -
    যাৱলী লোভনীযং
পীযূষাপ্লাৱিতোঽহং তদনু তদুদরে
    দিৱ্যকৈশোরৱেষম্।
তারুণ্যারম্ভরম্যং পরমসুখরসা -
    স্বাদরোমাঞ্চিতাঙ্গৈ -
রাৱীতং নারদাদ্যৈর্ৱিলসদুপনিষ -
    ৎসুন্দরীমণ্ডলৈশ্চ ॥ **100.1** ॥

নীলাভং কুঞ্চিতাগ্রং ঘনমমলতরং
    সংযতং চারুভঙ্গ্যা
রত্নোত্তংসাভিরামং ৱলযিতমুদয -
    চ্চন্দ্রকৈঃ পিঞ্ছজালৈঃ।
মন্দারস্রগ্ভিনিৱীতং তৱ পৃথুকবরী -
    ভারমালোকযেঽহং
স্নিগ্ধশ্ৱেতোর্ধ্ৱপুণ্ড্রামপি চ সুললিতাং
    ফালবালেন্দুৱীথীম্ ॥ **100.2** ॥

হৃদ্যং পূর্ণানুকম্পার্ণৱমৃদুলহরী -
    চঞ্চলভ্রূৱিলাসৈ -
রানীলস্নিগ্ধপক্ষ্মাৱলিপরিলসিতং
    নেত্রযুগ্মং ৱিভো তে।

সান্দ্রচ্ছাযং ৱিশালারুণকমলদলা -
    কারমামুগ্ধতারং
কারুণ্যালোকলীলাশিশিরিতভুৱনং
    ক্ষিপ্যতাং ময্যনাথে॥ **100.3** ॥

উত্তুঙ্গোল্লাসিনাসং হরিমণিমুকুর -
    প্রোল্লসদ্গণ্ডপালী -
ৱ্যালোলৎকর্ণপাশাঞ্চিতমকরমণী -
    কুণ্ডলদ্ৱন্দ্ৱদীপ্রম্।
উন্মীলদ্দন্তপঙ্ক্তিস্ফুরদরুণতর -
    চ্ছাযবিম্বাধরান্তঃ
প্রীতিপ্রস্যন্দিমন্দস্মিতমধুরতরং
    ৱক্ত্রমুদ্ভাসতাং মে॥ **100.4** ॥

বাহুদ্ৱন্দ্ৱেন রত্নোজ্জ্ৱলৱলযভৃতা
    শোণপাণিপ্রৱালে -
নোপাত্তাং ৱেণুনালীং প্রসৃতনখমযূ -
    খাঙ্গুলীসঙ্গশারাম্।
কৃৎৱা ৱক্ত্রারৱিন্দে সুমধুরৱিকস -
    দ্রাগমুদ্ভাৱ্যমানৈঃ
শব্দব্রহ্মামৃতৈস্ত্ৱং শিশিরিতভুৱনৈঃ
    সিঞ্চ মে কর্ণৱীথীম্॥ **100.5** ॥

উৎসর্পৎকৌস্তুভশ্রীততিভিররুণিতং
    কোমলং কণ্ঠদেশং
ৱক্ষঃ শ্রীৱৎসরম্যং তরলতরসমু -
    দ্দীপ্রহারপ্রতানম্।
নানাৱর্ণপ্রসূনাৱলিকিসলযিনীং

ৱন্যমালাং ৱিলোল -
ল্লোলম্বাং লম্বমানামুরসি তৱ তথা
ভাৱযে রত্নমালাম্॥ **100.6**॥

অঙ্গে পঞ্চাঙ্গরাগৈরতিশযৱিকস -
ৎসৌরভাকৃষ্টলোকং
লীনানেকত্রিলোকীৱিততিমপি কৃশাং
বিভ্রতং মধ্যৱল্লীম্।
শক্রাশ্মন্যস্ততপ্তোজ্জ্ৱলকনকনিভং
পীতচেলং দধানং
ধ্যাযামো দীপ্তরশ্মিস্ফুটমণিরশনা -
কিঙ্কিণীমণ্ডিতং ৎৱাম্॥ **100.7**॥

ঊরূ চারূ তৱোরূ ঘনমসৃণরুচৌ
চিত্তচোরৌ রমাযাঃ
ৱিশ্ৱক্ষোভং ৱিশঙ্ক্য ধ্রুৱমনিশমুভৌ
পীতচেলাৱৃতাঙ্গৌ।
আনম্রাণাং পুরস্তান্ন্যসনধৃতসম -
স্তার্থপালীসমুদ্গ -
চ্ছাযং জানুদ্ৱযং চ ক্রমপৃথুলমনো -
জ্ঞে চ জঙ্ঘে নিষেৱে॥ **100.8**॥

মঞ্জীরং মঞ্জুনাদৈরিৱ পদভজনং
শ্রেয ইত্যালপন্তং
পাদাগ্রং ভ্রান্তিমজ্জৎপ্রণতজনমনো -
মন্দরোদ্ধারকূর্মম্।
উত্তুঙ্গাতাম্ররাজন্নখরহিমকর -
জ্যোৎস্নযা চাঽশ্রিতানাং

সন্তাপধ্ৱান্তহন্ত্রীং ততিমনুকলযে
    মঙ্গলামঙ্গুলীনাম্॥ **100.9** ॥

যোগীন্দ্রাণাং ৎৱদঙ্গেষ্ৱধিকসুমধুরং
    মুক্তিভাজাং নিৱাসো
ভক্তানাং কামৱর্ষদ্যুতরুকিসলযং
    নাথ তে পাদমূলম্।
নিত্যং চিত্তস্থিতং মে পৱনপুরপতে
    কৃষ্ণ কারুণ্যসিন্ধো
হৃৎৱা নিশ্শেষতাপান্ প্রদিশতু পরমা -
    নন্দসন্দোহলক্ষ্মীম্॥ **100.10** ॥

অজ্ঞাৎৱা তে মহত্ত্বং যদিহ নিগদিতং
    ৱিশ্ৱনাথ ক্ষমেথাঃ
স্তোত্রং চৈতৎসহস্রোত্তরমধিকতরং
    ৎৱৎপ্রসাদায ভূযাৎ।
দ্ৱেধা নারাযণীযং শ্রুতিষু চ জনুষা
    স্তুত্যতাৱর্ণনেন
স্ফীতং লীলাৱতারৈরিদমিহ কুরুতা -
    মাযুরারোগ্যসৌখ্যম্॥ **100.11** ॥

॥ ইতি শ্রীমন্নারাযণীযে শততমং দশকং সমাপ্তম্॥